रस्य पानद्वारा वत्सपालनकरत्वात् तथाभूतत्वम् ।

**पालवणिज्** पु॰पाले कन्यारक्षणे वणिक् । कन्यापाले त्रिका॰

**पालल** त्रि॰ पललस्य तिलचूर्णस्य विकारः अण् । तिलचूर्णपिष्टके "पाललाः श्लेष्मजननाः शष्कुल्यः कफपित्तलाः" सुश्रु॰ ।

**पालाश** त्रि॰पलाशस्य विकारः अवयवो वा अण् । १पलाशावयवे २तद्विकारे च "पालाशो दण्ड आषाढः" अमरः । ३तमालपत्रे (तेजपात) राजनि॰तद्वर्णः अस्त्यस्य अण् । ४हरिद्वर्णे पु॰ ५तद्विशिष्टे त्रि॰ अमरः पलाशेन निर्वृत्तम् सङ्काशा॰ ण्य । पालाश्य पलाशनिर्वृत्ते त्रि॰। पलाशस्यादूरदेशादि वराहा॰ कक् । पालाशक तत्सन्निकृष्टदेशादौ । स्वार्थे क । तत्रार्थे

**पालाशखण्ड** पु॰ मगधदेशे शब्दरत्ना॰ ।

**पालाशि** पु॰ पलाश गोत्रप्रवर्षिभेदे प्रवराध्यायः ।

**पालि(ली)** स्त्री पल-बा॰ इण् । १कर्णलतायं २अश्रौ कोणे ३श्रेण्यौ ४अङ्कभेदे ५स्थानादिदेये च मेदि॰ ६यूकायां ७पोटायां ८प्रशंसायां ९प्रस्थे १०उत्सङ्गे क्रोडे च हेमच॰ वा ङीप् दीर्घान्तः ११स्थाल्याम् शब्दच॰ ।

**पालिंहिर** स्त्री मण्डलिसर्पभेदे सुश्रुतः अहिशब्दे दृश्यम् ।

**पालिका** स्त्री पालि+स्वार्थे क । १पालिशब्दार्थे संज्ञायां कन् । २कर्णपत्रे शब्दच॰ ३दध्यादिच्छेदन्यां हारा॰ । ४पालनकर्त्र्यां स्त्रियां च ।

**पालित** त्रि॰ पाल-क्त । १रक्षिते क्रोष्टुवंश्ये २नृपभेदे ३देशभेदे च पु॰ हरिवं॰३७अ॰। ४शाखोटवृक्षे पु॰शब्दार्थकल्प॰ ५कुमारानुचरमातृभेदे स्त्री भा॰श॰ ४७अ॰।

**पालित्य** न॰ पलितस्य भावः ष्यञ् । केशादेः शुभ्रतादौ । पलितस्यादूरदेशादि सङ्काशा॰ण्य । पलितस्य सन्निकृष्टदेशादौ त्रि॰। [नृपभेदे पु॰ हरिवं॰ ३अ॰।

**पालिन्** त्रि॰ पालयति पालि-णिनि । १पालके २पृथुपुत्र-

**पालिन्द** पु॰ पालि-बा॰ किन्दच् । १कुन्दुरुवृक्षे राजनि॰ । २श्यामालतायां स्त्री अमरः गौरा॰ ङीष् । पलिन्दीति पाठान्तरम् पृषो॰ । ३त्रिवृतायां त्रिकाण्डकोषः ।

**पालिशायन** पु॰ गोत्रप्रवर्षिभेदे प्रवराध्यायः ।

**पालीवत** काष्ठरोप्ये वृक्षभेदे वृ॰सं॰ ५४अ॰ ।

"द्राक्षापालीवताश्चैव बीजपूरातिमुक्तकाः । एते द्रुमाः काष्ठरोप्या गोमयेन प्रलेपिताः । मूलच्छेदेऽथ वा स्कन्धे रोपणीयाः प्रयत्नतः" ।

**पालोहय** पु॰ गोत्रप्रवरर्षिभेदे प्रवराध्यायः ।

**पाल्लक** त्रि॰ पल्ल्यां भवः धूमा॰ वुञ् । पल्लीभवे जानदौ

**पाल्वलतीर** त्रि॰ पल्वलतीरे भवः अञ् । पल्वलतीरभवे

**पावक** पु॰ पुनाति पू-ण्वुल् । १वह्नौ अमरः "अपावनानि सर्वाणि वह्निसंसर्गतः क्वचित् । पावनानि भवन्त्येव तस्मात् स पावकः स्मृतः" इति काशीख॰ ९अ॰ उक्तेस्तस्य तथात्वम् । २वैद्युताग्नौ च "पावकः पवमानश्च शुचिरग्निश्च ते त्रयः । निर्मन्थ्यः पवमानः स्यात् वैद्युतः पावकः स्मृतः । यश्चासौ तपते सूर्य्यः शुचिरग्निश्च स स्मृतः" कूर्मपु॰ । ३सदाचारे ४वह्निमन्थे ५चित्रकवृक्षे ६भल्लातके ७विडङ्गे च मेदि॰। ८शोधके त्रि॰ हेमच॰। ९रक्तचित्रके १०कुसुम्भे च पु॰ राजनि॰ ११वरुणे १२सूर्ये च ऋ॰१।५०।६भा॰तयोश्च शोधकत्वात् तथात्वम् । १३ऋषिभेदे भा॰व॰१२५अ॰। पावः पवनं शुद्धिस्तं कायति कै-क । १४सरस्वत्यां स्त्री ऋ॰ १।३।१०भा॰। पावकाश्च सप्तविंशतिः "पावकाः सप्तविंशतिः" भा॰स॰ ७अ॰व्याख्यायां नीलकण्ठधृतवाक्येभ्यः तानि च "ब्रह्मणोऽङ्गात् प्रसूतोऽग्निरङ्गिराः१ इति विश्रुतः । दक्षिणाग्निगार्हपत्याहवनीयाविति२।३।४ त्रयी । निर्मन्थ्यो५ वैद्युतः६ शूरः७ संवर्त्तो८ लौकिक९स्तथा । जाठरो१०विषगः११ क्रव्यात्१२ क्षमवान्१३ वैष्णव१४स्तथा । दस्युमान्१५ बलद१६श्चैव शान्तः१७ पुष्टो१८विभावसुः१९ । ज्योतिष्मान्२० भरतो२१ भद्रः२२ २३स्विष्टकृद्वसुमान्२४ क्रतुः२५ । सोमश्च२६ पितृमां२७श्चैव पावकाः सप्तविंशतिः" । अन्ये पावकभेदा अग्निशब्दे ५२पृ॰ दृश्याः ति॰त॰गृह्यपरिशिष्टे कर्मभेदे तस्य नामभेदा उक्ता यथा

"लौकिके पावको१ ह्यग्निः प्रथमः परिकल्पितः । अग्निस्तु मारुतो२ नाम गर्भाधाने विधीयते । पुंसवने चन्द्रनामा३ शुङ्गाकर्मणि शोभनः४ । सीमन्ते मङ्गलो५ नाम प्रगल्भो६ जातकर्मणि । नाम्नि स्यात् पार्थिवो७ ह्यग्निः प्राशने च शुचि८स्तथा । सत्यनामा९थ चूडायां व्रतादेशे समुद्भवः१० । गोदाने सूर्य्यनामा११ च केशान्ते ह्यग्नि१२रुच्यते । वैश्वानरो१३ विसर्गे तु विवाहे योजक१४स्तथा"। गोदाने गोदानाख्य संस्कारे । "चतुर्थ्यान्तु शिखी१५ नाम धृति१६रग्निस्तथाऽपरे" । अपरे धृतिहोमादौ । "प्रायश्चित्ते विधु१७श्चैव पाकयज्ञे तु साहसः"१८ । प्रायश्चित्ते तदात्मकमहाव्याहृतिहोमादौ । पाकयज्ञे पाकाङ्गकवृषोत्सर्गगृहहोमादौ । "लक्षहोमे च वह्निः१९ स्यात् कोटिहोमे हुताश-